**United International Journal of Multidisciplinary Research**
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

# भारतीय ज्ञानपरम्परा – राजनीतिः

**Dr. K.V.R.B. Varalakshmi**
HOD of Sanskrit
Sri Y.N.M. College, Narsapur, W.G. Dist., A.P.-534275
Cell: 9393392619
Email Id: varalakshmikvrb@gmail.com

**ईपोद्घातः**

भारतीयसंस्कृतिः सदाचारस्य च मूलस्तम्भः वेदः एव भवति।

"वेदो धर्ममूलम्"[1] इति गौतमसूत्रं पूर्वोक्तं विषयं प्रतिपादयति।

वेदानां बहुजनप्रचारार्थं सामान्यजनहितार्थं च इतिहास-पुराणानामाविर्भावः आवश्यकः अभूत्। अत एव भगवान् वेदव्यासमहर्षिः अष्टादशपुराणानि, श्रीमन्महाभारतं च व्यरचयत्।

"अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।
पश्चाद् भारतमाख्यानं चक्रे तदुपबृंहितम्॥"[2]

इति श्लोकेऽयं विषयः प्रतिपादितः।

वेदेषु प्रतिपादितानां विषयाणां सुलभतयावगाहनार्थम् इतिहास-पुराणानि आवश्यकानि भवन्ति। वेदप्रतिपादितविषयाणां निगूढार्थानां च सुस्पष्टीकरणं पुराण-इतिहासाभ्यामेव शक्यते।

पुरुषार्थविचारणार्थम् ऐहिकामुष्मिकफलप्राप्त्यर्थं च पुराण-इतिहासानां परिशीलनम् आवश्यकम्। श्लोकोऽयं एष विषयं सूचयति—

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति॥"[3]

"धर्मे च अर्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥"[4]

अनेन इतिहासः इति सुप्रसिद्धं श्रीमन्महाभारतं चतुर्विधपुरुषार्थसमन्वितम्, सर्वशास्त्रसारम् इति च ज्ञायते।

लोके धर्माधर्माणां नियमनहेतुः राजा भवति। राज्ञां प्रभावेण राज्यस्य स्थितिः शान्तिश्च सम्भवति। राजा धर्मयुक्तः चेत् ब्राह्मण-क्षत्रियादि प्रजाः स्वस्वधर्मान् सम्यगाचरन्ति। तथैव ब्रह्मचर्याद्याश्रमधर्माः अपि आचरणीयाः भवन्ति।

राजा धर्मपालनात् राज्यं, धनं, सौख्यं च प्राप्तुं शक्नोति। अधर्मः तु दुःखहेतुः भवति इति ज्ञायते। तस्मात् राज्ञा सुखमिच्छता धर्मपालनम् अवश्यं कर्तव्यम्, पापाधर्मपालनं विसर्जनीयम् इति ज्ञायते।

राज्ञां धर्मयुक्तपरिपालनम् एव मोक्षहेतुः भवति। अत एव स्मृतिपुराणादिषु राजधर्माः प्रतिपादिताः।

अन्नपूर्णपुराणे सामान्यधर्मः एवं प्रतिपादितः—

“अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा।
वर्णानां लिङ्गिनां चैव सामान्योधर्म उच्यते॥”

हिंसाराहित्यं, सत्यं, शौचं, दया, क्षमा इत्येतत् सर्वेषां सामान्यधर्मः इति ज्ञायते। न्यायमार्गेण धनार्जनं, वृद्धिः, रक्षणं, सत्पात्रे दानम् इति राजप्रवृत्तिः चतुर्विधा भवति।

“यस्मिन् धर्मो विराजते तं राजानं प्रचक्षते।”

इति वचनानुसारं यः पालकः धर्मस्य योग्यस्थानं ददाति, यस्य राज्ये धर्मः प्रकाशते सः राजा भवति इति ज्ञायते। अत एव राजधर्मः बहुधा श्लाघ्यते।

यः राजा प्रजान् मनोरञ्जकपरिपालनैः सन्तोषयति सः राजा इत्युच्यते। धर्मवृद्धिः राज्ञां वर्तते। तथैव राज्ञां सुखकारकाः विनाशकारकाः च अन्वयव्यतिरेकाभ्यां सूचिताः।

राजन् शब्दस्य क्षत्रियः, नरेन्द्रः इत्यादिशब्दाः पर्यायवाचकाः।

“प्रधानं क्षत्रियकर्म प्रजानां परिपालनम्” इति श्रूयते।

क्षत्रियस्य प्रजापरिपालनम् एव प्रधानं कर्म भवति।

“सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्” इति स्वयंभुववाक्येन अपि प्रजासंरक्षणम् एव सूच्यते।

अतः राजा राजधर्मसमन्वितः प्रजापालनसंरक्षकः भवति। यदि तथा, तदा राज्यं सुभिक्षं भवति इति ज्ञायते।

एवम् शान्तिपर्वान्तर्गते उतथ्य तथा वामदेवगीतासु राजधर्माः प्रतिपादिताः।

श्रीमन्महाभारतान्तर्गतशान्तिपर्वणि "प्रजासंरक्षणतत्परेण राज्ञा प्रजासु कथं वर्तितव्यम्" इति युधिष्ठिरेण पृष्टः भीष्मः उतथ्य-मान्धातृसंवादरूपां उतथ्यगीताम् आह। आत्रेयवंश्यः ब्रह्मविद् उतथ्यः युवनाश्वपुत्राय मान्धात्रे प्रीत्या क्षत्रियधर्मान् उपदिदेश।

लोकपरिरक्षकेण राज्ञा धर्मार्थं परिपालनीयम्, न कामाभिभूतेन। धर्माचरणतत्परः राजा देवत्वम् आप्नोति।

"नृपस्य परमो धर्मः प्रजानां परिपालनं दुष्टनिग्रहणं नित्यम्।"

धर्मपरिपालनविषये राजा अत्यन्त जागरूकः भवेत्, नो चेत् प्रजाः दुश्चरिताः भवन्ति। तेन राज्ञः नरकप्राप्तिः भवति। नित्यं प्रजानुरञ्जकपरिपालनं तथा दुष्टानां विनाशकत्वं च राज्ञः धर्मः भवति इति ज्ञायते। यदि राजा धर्माचरणशीलः भवति, प्रजाः अपि धर्मयुक्ताः भवन्ति।

**राज्ञो गुणाः**

यदि राजा अधर्माचरणशीलः चेत् तदा प्रजाः अपि अधर्मानुशीलिनः एव भवन्ति।

शान्तिपर्वान्तर्गत राजधर्मपर्वणि "सुमुखत्वं, स्मितपूर्वाभिभाषित्वं" इति गुणौ राज्ञि अवश्यं भाव्यौ भवतः इत्युपदिशति।

किञ्चात्रैव शान्तिपर्वान्तर्गत राजधर्मपर्वणि महाभारतम्—

"वृद्धोपासकत्वम्, अलसत्वविजयः, लोलुपत्वजयः, सत्प्रवर्तनशीलत्वम्, सन्तुष्टत्वम्, रम्यदर्शनत्वम्" इति गुणाः राज्ञि अवश्यं भाव्याः भवन्ति इत्युपदिशति।